हरः सरः। अहृद्यस्तर्पणोऽतीव वृंहणः कफवर्द्धनः। तस्य खण्डं गुरु परं रोचनं चिरपाकि च। मधुरं वृंहणं बल्यं शीतलं वातनाशनम् वातपित्तहरं रुच्यं वृंहणं बलवर्द्धनम्। वृष्यं वर्णकरं स्वादु दुग्धाक्तं गुरु शीतलम्। मन्दानलत्वम् विषमज्वरञ्च रक्तामयं बद्ध गुदोदरञ्च। आम्रातियोगो नयनामयञ्च करोति तस्मादिति तानि नाद्यात्। एतदम्लाम्रविषयं मधुराम्रपरं न तु। मधुरस्य परं नेत्रहितत्वाद्या गुणायतः। शुण्ठ्यम्भस्त्वनुपानं स्यादाम्राणामतिभक्षणे। जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च। आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम्। ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्। आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्"। पल्लवमत्र नवदलम्। अस्य शाकपाकप्रकारस्तत्रैव "स्विन्ना निष्पीड़िताः कामं कोकिलाहारपल्लवाः। घृतसिन्धूत्थसंसिद्धा रुच्या रामठवासिताः। सर्पिषा खण्डयुक्तास्ते तलितास्त्वाम्रपल्लवाः। लवङ्गार्द्रकसंयुक्तामरीचै रुचिकारकाः"। अस्य पल्लवमुकुलानां पाकप्रकारस्तत्रैव "आम्रस्य चैव नवताम्ररुचिप्रबालाः खण्डीकृतालवणमिश्रितपिण्डिताश्च। वाह्लीकधूपनजुषोघृतदुग्धसिद्धाः सन्दीपयन्ति पवनस्य सखायमेते। मुकुलः सहकारशाखिनः घृतखण्डीकृतसैन्धवान्वितः। दधिमन्थमरीचसंस्कृतश्चिरजातामरुचिं छिनत्ति हि। कफपित्तहरौ हृद्यौ मुखवैरस्यनाशनौ। वह्निसञ्जननौ रुच्यौ चूतजौ पुष्पपल्लवौ। आम्रमामं जलस्विन्नं मर्द्दितं दृढ़पाणिना। सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम्। प्रपानकमिदं श्रेष्ठं भीमसेननिर्म्मितम्। सद्योरुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणमिति"। [शाकभेदे राजनि०।

**आम्रगन्धक** पु० आम्रस्येव गन्धोऽस्य कप्। समष्टिलवृक्षे,

**आम्रगुप्त** पु० गोत्रप्रवर्त्तके ऋषिभेदे। तस्यापत्यम् उदीचां वृते फिञ्। आम्रगुप्तायनिः पु० स्त्री० प्राचान्तु मते इञ्। तदपत्ये सि०कौ०।

**आम्रपेशी** त्रि० आम्रस्य पेशीव। शुष्काम्रकोषे (आमसी)

**आम्रमय** त्रि० आम्रस्य विकारः अवयवो वा वृद्धत्वात् मयट्। १आम्रविकारे। २तदवयवे च।

**आम्ररसाकृति** स्त्री आम्ररसस्येवाकृतिः स्वादो यस्याः। पीताख्य रसालाभेदे। तत्पाकप्रकारो यथा भा०प्र० "किञ्चित् कुङ्कुमसंयुक्तं विमस्तुदधिगालितम्। सशर्करं भवेत् शीता पक्वाम्ररससन्निभा। शीता शिखरणी या सा बल्या वर्षवती हि सा। सुरुच्या मधुरा बल्या वातपित्तहरा मता" अत्र पीताख्यशिखरिण्याः पक्वाम्ररसतुल्यत्वोक्त्या तथात्वम्। [दायात्मके वने।

**आम्रवण** न० आम्रस्य वनम् नित्यं णत्वम्। आम्रवृक्षसमु-

**आम्रात** पु० आम्रमाम्ररसमतति अत–पचा० अच्। (आमड़ा) १वृक्षे २तत्फले न०। तत्फलस्याम्रतुल्यरसत्वात्तथात्वम्। "आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत् परम्। सुपक्वं तुवरं स्वादु रसपाकं हिमं स्मृतम्। तर्पणं श्लेष्मलं स्निग्धं रुच्यं विष्टम्भि वृंहणम्। गुरु बल्यं मरुत्पित्तक्षतदाहक्षयास्रजित्" भा०प्र०।

**आम्रातक** पु० आम्र इवातति आम्रात् किञ्चिदूनरसफलकत्वात् अत–ण्वुल्। (आमड़ा) १वृक्षे २तत्फले न०। आम्रेण तत्फलरसेन तकते प्रकाशते आ+तक–हासे अच्। शुष्काम्ररसनिर्म्मिते (आमट्) द्रव्यभेदे तत्करणप्रकारः भावप्र० उक्तः। यथा "आम्रस्य सहकारस्य कटे विस्तारितोरसः। घर्म्मशुष्को मुहुर्दत्त आम्रातक इति स्मृतः"।

**आम्रातकेश्वर** पु० आम्रातक इव ईश्वर ईश्वरलिङ्गमत्र। सिद्धस्थानभेदे। "आम्रातकेश्वरे सूक्ष्मा सूक्ष्माख्या परमेश्वरी" देवीपु०।

**आम्रावती** स्त्री आम्र आम्ररसो विद्यतेऽस्यां मतुप् मस्य वः शरा० दीर्घः। नदीभेदे। तस्या आम्रतुल्यरसतोययुक्तत्वात्तथात्वम्।

**आम्रावर्त्त** पु० आम्रइव तुल्यरसतया ईषत् वर्त्तते आ+वृत–अच्। १आम्रातकवृक्षे २तत्फले न०। आम्रेण आम्ररसेन आवर्त्त्यते निष्पाद्यते आ+वृत–णिच्–कर्म्मणि घञ् (आमट्) ख्याते २पदार्थे आम्रातकशब्दे तत्करणप्रकार उक्तः "आम्रावर्त्तस्तृषाच्छर्द्दि वातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकात् लघुश्च स हि कीर्त्तितः" भावप्र०।

**आम्लिमन्** पु० अम्लोरसोऽस्त्यस्य प्रज्ञा० अण् दृढा० गणपाठात् रस्य लः ततोभावे दृढ़ा० इमनिच्। अम्लत्वे रसभेदे वा ष्यञ्। आम्ल्यमप्यत्र न०।

**आम्रेडित** त्रि० आ+म्रेड–उन्मादे अच् आम्रेडेन उन्मत्तेनेवाचर्य्यते आम्रेड+आचारे क्विप् ततः क्त। उन्मत्तेन यथा कथितस्य पुनःपुनः कथनं क्रियते एवं द्विस्त्रिःकथिते "आम्रेडितस्यान्यस्य तु वा" पा०।

**आम्लवेतस** पु० आम्लः अम्लरसयुक्तः वेतस इव। १अम्लवेतसवृक्षे राजनि० स्वार्थे संज्ञायां वा कन्। २तिन्तिडीवृक्षे (तेतुल)।